## अत्रानुनासिकः पूर्वस्य तु वा। (२/१३६)

अधिकारोऽयम्। इत उत्तरं यस्य स्थाने रुः विधीयते ततः पूर्वस्य [1]तु वर्णस्य वा [2]अनुनासिको भवति इत्येतदधिकृतं वेदितव्यम्, यद् इत ऊर्ध्वम् अनुक्रमिष्यामस्तत्र। वक्ष्यति – 'समः सुटि' (८.३.५/१३५)। सँस्कर्ता। सँस्कतुम्। सँस्कर्तव्यम्[3]। अत्र[4]ग्रहणं रुणा सह संनियोगप्रतिपत्त्यर्थम्। अधिकारपरिमाणा[5]परिग्रहे हि सति 'ढो ढे लोप' (८.३.१३/२३३५) [6]इत्यत्रापि पूर्वस्य अनुनासिकः [7]आशङ्क्येत॥

## आतोऽटि नित्यम्। (३/३६३२)

अटि परतो रोः पूर्वस्य [8]आकारस्य स्थाने नित्यमनुनासिकादेशो भवति। 'दीर्घादटि [9]समानपादे' (८.३.९/३६३१) इति रुत्वं वक्ष्यति, ततः पूर्वस्य [10]आतो[11]ऽनुनासिकविकल्पे प्राप्ते नित्यार्थं वचनम्। '[12]महाँ असि' (ऋ. ३.४६.२)। 'महाँ इन्द्रो य ओजसा' (ऋ. ८.६.१)। 'देवाँ [13]अच्छा दीद्यत्' (ऋ. ३.१.१)। केचिदनुस्वारमधीयते, स च्छान्दसो व्यत्ययो द्रष्टव्यः। आतः इति किम्? 'ये वा[14] वनस्पतींरनु' (वा. सं. १३.७)। अटि इति किम्? भवांश्चरति। भवांश्लाघयति। नित्यग्रहणं विस्पष्टार्थम्॥

## अनुनासिकात् परोऽनुस्वारः। (४/१३७)

अन्यशब्दोऽत्राध्याहर्तव्यः। तदपेक्षया चेयमनुनासिकात् इति पञ्चमी। अनुनासिकादन्यो यो वर्णः रोः [15]पूर्वः, यस्य अनुनासिकः न [16]कृतः, ततः परोऽनुस्वार आगमः भवति। वक्ष्यति – 'समः सुटि' (८.३.५/१३५)। संस्कर्ता। संस्कर्तुम्। संस्कर्तव्यम्। 'पुमः खय्यम्परे' (८.३.६/१३९)। [17]पुंस्कामा। [18]'नश्छव्यप्रशान्' (८.३.७/१४०)। भवांश्चरति। केचित् तु परशब्दमेवा[19]न्यार्थं वर्णयन्ति। अनुनासिकात् परः अनुनासिकात् अन्यः अनुस्वारो भवति। यस्मिन् पक्षेऽनुनासिको [20]नास्ति तत्र अनुस्वारागमो भवति[21]। स तु कस्यागमो भवति? रोः पूर्वस्य[22]वेति वर्तते, व्याख्यानादादेशो न [23]भवति॥

## समः सुटि। (५/१३८)

रुः[24] वर्तते। [25]समः इत्येतस्य रुः भवति सुटि परतः संहितायां विषये। सँस्कर्ता। सँस्कर्तुम्। सँस्कर्तव्यम्। संस्स्कर्ता। संस्स्कर्तुम्। संस्स्कर्तव्यम्। अत्र रोर्विसर्जनीये कृते 'वा शरि' (८.३.६६/१५१) इति पक्षे विसर्जनीय [26]एव प्राप्नोति। [27]व्यवस्थितविभाषा [28]द्रष्टव्या। तेन [29]अत्र नित्यं सकार एव [30]भवति।

---

1. तु नास्ति ब. इ. ड. 2. अनुकासिकादेशः ब. इ. 3. पुमः खय्यम्परे – पुंस्कामा इत्यधिकम् इ. 4. इति इत्यधिकम् इ. 5. परिज्ञाने ब. क. इ. 6. इत्येवमादावपि ब. क. 7. आशङ्क्यते इ. 8. आतः इ. 9. समानपदे इ. 10. आतः नास्ति ब. 11. अनुनासिको भवति क. 12. भव इत्यधिकम् क. 13. अच्छा दीव्यत् इति मुद्रितः पाठः 14. वाचस्पतींरनु इ. 15. पूर्वस्य यस्य क. 16. विहितः ह. 17. पुंस्कोकिलः ब. क, पुंस्त्वम् ड. 18. वाक्यमिदं नास्ति ड. 19. अन्यार्थे इ. 20. न भवति इ. 21. इत्यर्थः इत्यधिकम् ब. क. इ. ह. 22. एव नास्ति इ. 23. भविष्यति ब. ड. ह. 24. इति इत्यधिकम् क. 25. सम् इ. 26. एव नास्ति इ. 27. सा च इत्यधिकम् ब. क. इ. ह. 28. विज्ञायते ह. 29. एतस्मिन्नेव क. इ. 30. भविष्यति ह.